International Journal of Sanskrit Research 2023; 9(6): 01-03

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(6): 01-03
© 2023 IJSR
www.anantaajournal.com
Received: 02-09-2023
Accepted: 04-10-2023

**Dr. Naveen Bhat**
Assistant Professor, Department of Sanskrit & Vedic Studies, Sri Sathya Sai University for Human Excellence, Kalaburagi, Karnataka, India

**Corresponding Author:**
**Dr. Naveen Bhat**
Assistant Professor, Department of Sanskrit & Vedic Studies, Sri Sathya Sai University for Human Excellence, Kalaburagi, Karnataka, India

# हर्षचरितकाव्ये समाजकल्याणाय धर्मोपदेशः

**Dr. Naveen Bhat**

**DOI:** https://doi.org/10.22271/23947519.2023.v9.i6a.2231

## सारांश
मानवजीवनस्य मूललक्ष्यं आत्यन्तिकसुखप्राप्तिर्वर्तते I पुरुषार्थेष्वपि मोक्षः सुखस्वरूपः परमः पुरुषार्थः इति निगद्यते। मानवः आनन्दं प्राप्तुं बहुविधान् उपायान् आविष्करोति, आगमापायिनं सुखमनुभूय अतृप्तः सन् सुखान्तरमन्विष्य जीवनं यापयति। केवलम् आहारनिद्रादिकं सुखमनुभूयापि स्वात्मोन्नतये स्वप्रज्ञया सर्वदा प्रयत्नशीलो भवति। इदमेव मानवस्य वैशिष्ट्यम् I अत एव 'धर्मो हि तेषामधिको विशेष' इति कथयन्ति I अत्र स्वबुद्ध्या मानवः लोककल्याणाय धर्ममाचरति इति सामान्यप्राणिभ्यः अयं विशिनष्टि। यतः धर्माचरणं समेषामपि मानवानाम् आद्यं कर्तव्यम् I यतः श्रीकृष्णः अपि 'अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्' 'परित्राणाय साधूनाम्' इत्यादिभिः वचनैः सर्वान् अस्मान् धर्माचरणे प्रेरयति I एतादृशं प्रेरणावचनं सम्प्राप्य एव संस्कृतकवयः स्वकृतिषु धर्मजागृतिं प्रसारयन्ति। तत्र कालिदासादयः कवयः मूर्धन्यः भवन्ति। अत्रेदानीं हर्षचरिते ग्रन्थे अपि बाणबट्टः आस्तिकजनेषु धर्मजागृतिं अकरोदिति पश्यामः I

कूटशब्द : काव्यविभागः, क्षमायाः प्राशस्त्यम्, महापुरुषसंश्रयः, शोकः नाशस्य मूलम् I

## प्रस्तावना
अस्माकं काव्यप्रपञ्चे वाल्मीकिप्रभृतयः अनेके कवयः विराजन्ते। वेदपुराणेतिहासेषु प्रतिपाद्यमानान् विचारान् अत्यन्तसुललितभाषया सर्वेषाम् अध्येतृणाम् अर्थावगमः यथा स्यात् तथा निबध्नन्ति। अत्र जन्मप्राप्तानां समेषामपि आद्यं कर्तव्यं यत् अस्मदृषिभिः वेदाख्यं योगदानं यद् दत्तं तस्य "स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्" इत्युपदिष्टप्रकारेण अध्ययनाध्यापनप्रचारः एव। किन्तु तदिदानीन्तने जगति कष्टसाध्यं स्यात्। एतत्सर्वं परिगणय्य एव ऋष्यनन्तरकाले आगताः अस्मद्धित-चिन्तकाः आचार्याः, कवयश्च पुराणकाव्यभाष्यादीन् अरचयन्। काव्यादीन् द्वारीकृत्यैव ऋष्यन्तरङ्गभूतं वेदसन्देशं समाजाय प्रायच्छन्। यथा ऋग्वेदे मन्त्रः –

समानीव आकूतिः समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सुसहासति ॥[1]

[1] ऋग्वेदः – १०/१९१/४

ऋषिभिः मन्त्रेषु समग्रस्य चराचरस्य उन्नतये बहुधा उपदेशः प्रदत्तः किन्तु तेषामुपदेशानाम् निर्णायकत्वेन कथयन्ति समानीव इत्यादयः मन्त्राः। समाजस्य स्वास्थ्यं प्रतिव्यक्त्याधारितं भवति यदि मनुष्येषु मिथः विगानं स्यात् तर्हि तत्समाजस्योपरि दुष्परिणामं जनयेत्। अत प्रतिव्यक्तौ दोषापनयनेन गुणाधानमेव काव्यस्य लक्ष्यं भवति।उच्यते च

> धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च। करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥[2]

किञ्च काव्यस्य उपादेयत्वं कियत् कष्टमिति अग्निपुराणे उक्तम् –

> नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा। कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ॥[3] इति

काव्येषु पद्यं-गद्यं-चम्पू-नाटकमिति भेदाः सन्ति। तत्र गद्यकाव्यस्य रचनम् अत्यन्त कष्टकरं भवति। बहवः श्लोकात्मकं काव्यं रचयन्ति किन्तु कश्चन एव गद्यकाव्यस्य रचनाय यतते। उक्तञ्च – 'गद्यं कवीनां निकषं वदन्ति' इति। तत्रापि काव्यानि कविकल्पना-धारितानि, तीर्थक्षेत्राधारितानि, इतिहासाधारितानि इति च प्रभेदाः भवन्ति। तत्रापि ऐतिहासिकस्य काव्यस्य अत्यन्ताकर्षकरूपेण लेखनं कष्टसाध्यमेव भवति। किन्तु बाणभट्टः अस्यापि नान्दिमकरोत्। अयं अस्मिन् हर्षचरिते काव्ये अत्यन्तमनोज्ञरूपेण प्रासङ्गिकरूपेण च रसान् प्रतिपादितवान्। अत एव उच्यते 'बाणोच्छिष्टं जगत्सर्वम्' इति। बाणाभट्टः स्वेन रचिते हर्षचरिते अनेकान् जीवनमौल्यांशान्, वेदपुराणेतिहाससम्बद्धान् विचारान् प्रतिपादिवान् अस्ति। एतद्पृष्ठभूमौ हर्षचरिते काव्ये उद्धृतानि कानिचन् वाक्यानि पश्यामः।

> कियद्दूरं वा चक्षुरीक्षते। विशुद्धया हि धिया पश्यन्ति कृतबुद्धयः सर्वाननर्थानसतः सतो वा।[4]

अत्र अस्माकं चर्मचक्षुष्मतां इयत्ताकरणम् अनेन ज्ञायते। बाह्येन्द्रियेभ्यः सर्ववस्तूनां दर्शनम् अशक्यम्। किन्तु ये धर्माद्याचरणेन तपसा सत्यवचसा च संस्कृतबुद्धयः विशुद्धान्तकरणाः च सन्ति तेभ्यः सर्वमपिविशुद्धान्त-करणाः च सन्ति तेभ्यः सर्वमपि लौकिकालौकिकं हस्तामलकवत् स्पष्टं भविष्यति। अनेन इन्द्रियातीत-तस्य ज्ञानस्य प्राशस्त्यं कथयति।

> 'क्षमा हि मूलं सर्वतपसाम्'।[5]

अत्र क्षमा गुणस्य महत्वमुक्तमस्ति। अस्मिन् समाजे गुणैः श्रेष्ठाः तपस्विनः किन्तु ते क्षमागुणविहीनाश्चेत् तेषां तपः निरर्थकं भवतीति भावः।

> 'परदोषदर्शनदक्षा दृष्टिरिव कुपिता बुद्धिर्न ते आत्मरागदोषं पश्यति'।[6]

इदं बाह्येन्द्रियं सर्वदा बाह्यान् पदार्थानेव पश्यति किन्तु यदा दोषदृष्टिभाक् भवति तर्हि परदोषदर्शनतुष्टं मनः भवति, इदं स्वात्मने अहितकरं स्यात्। एतादृशं मनः स्वात्मगतदोषं न कदापि पश्यति। एतादृशः एव असात्विकः भूत्वा दोषान् आचरति। अत अस्माभिः सर्वदा स्वात्मावलोकनम् आदौ कर्तव्यम्, तदुक्तम् - 'प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः' इति।

> 'अतिरोषणश्चक्षुष्मानन्ध एव जनः'।[7]
> न हि कोपकलुषिता विमृशति मतिः कर्तव्यमकर्तव्यं वा।[8]

लौकिकपरिभाषया यः चक्षुषा पदार्थान् द्रष्टुं न शक्नोति सः अन्धः किन्तु कविः बाणभट्टः एवमभिप्रैति यत् यस्य चित्तं इन्द्रियाणि च कामक्रोधादिभिः दोषैः अपहतं भवति सः याथार्थ्येन अन्धः भवति। सर्वेष्वपि मनुष्येषु मनस्सु कामादयः शत्रवः भवन्त्येव। यदि वयं तेषां कामादीनां दासाः भवामः जीवने साफल्यं न विन्दामः। प्रतिनित्यम्

[2] साहित्यदर्पणम्

[3] अग्निपुराणम्

[4] हर्षचरितम् – १ उच्छ्वासः

[5] हर्षचरितम् – प्रथम-उच्छ्वासः

[6] हर्षचरितम् – प्रथम-उच्छ्वासः

[7] हर्षचरितम् – प्रथम-उच्छ्वासः

[8] हर्षचरितम् – प्रथम-उच्छ्वासः

अन्धत्वादि दोषैः अनर्थव्रातकूपेषु पतामः। यतः कामक्रोधादिभिः मनः बुद्धिः च कलुषिता भवति, कलुषितेन मनसा जन्तवः किङ्कर्तव्यताविमूढाः भवन्ति। अत कर्तव्याकर्तव्यं विमर्शयितुम् अशक्ताः भवन्ति।

'दुस्त्यजा जन्मभूमयः'।[9]

स्वभावो दुरतिक्रमः इतिवत् अस्माकं कुलाचारः, संस्कृतिः, सम्बन्धइनः, स्वधर्मः, विचाराः च प्रत्येकं मनुष्यस्य जन्मभूमिः। इदं जीवने अत्यन्तं मुख्यमिति अस्य वाक्यस्य तात्पर्यम्। अन्यत्रापि उच्यते – जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इति। एवम् अन्यान्यपि उद्धृतानि वाक्यानि –

'अक्षीणः खलु दाक्षिण्यकोषः महताम्'।[10]

महापुरुषाणां स्वभावः एव अयं यत् दाक्षिण्यादीनां सद्गुणानां आगरः एव भवति। तेषु सद्गुणाः अक्षीणाः एव भवन्ति इत्यर्थः।

'महद्भिस्तु यथार्थदर्शिभिर्भवितव्यम्'।[11]

यथार्थदर्शिनः एव महापुरुषाः भवन्ति। तैः अस्मिन् लोके न कदापि भ्रमितव्यम्। यतः इमे जनाः महाजनान् (महापुरुषान्) अनुसरन्ति। तदुक्तम् – यद्ययद्याचरति श्रेष्ठस्तद्देवेतरो जनाः, 'महजनो येन गतः स पन्थाः' इत्यादयः ॥

'भर्तृचित्तानुवर्तिन्यश्चानुजीविनां प्रकृतयः'।[12]

सामान्यजनाः सर्वेऽपि राजानमनुवर्तन्ते। राजा हि प्रत्यक्षदैवता इति उक्तप्रकारेण सामान्यजनानां प्रकृतयः राजानुगुण्यं भवति।एतदेव अत्र उक्तं भवति। एवमेव हर्षचरिते अन्यत्रापि एदादृशवाक्यानि उदाहृतानि सन्ति यथा –

'विद्वज्जनसम्पर्को नष्टेष्टज्ञातिदर्शनाभ्युदयः।
कस्य न सुखाय भवने भवति महारत्नलाभश्च' ॥
'शोको हि नाम पर्यायः पिशाचस्य' ॥[13]

कां नु गतिं गमिष्यति ? काम् वा योनिं प्रवेक्ष्यति ? कस्मिन्वा नरके निपतिष्यति ? नामापि च गृहणतोऽस्य पापकारिणः पापमलेन लिप्यत इव मे जिहवा। निजगृहदूषणं जालमार्गप्रदीपकेन कज्जलमिवातिमलिनं केवलमयशः सञ्चितं गौडाधमेन।
इत्येवं प्रकारेण बाणभट्तस्य काव्यशैली अत्यन्तसुमधुरा अस्ति। एवम् अनेके विचाराः मानवस्य उन्नतये समाजस्य स्वास्थ्याय च उपकुर्वन्ति। अत्र या संस्क्रुतभाषा अनेन प्रयुक्ता सापि गूढार्थयुक्ता अत्यन्तसरलभाषा वर्तते। इदानीमपि बाणभट्टसदृशाः कवयः अपेक्षिताः सन्ति। येन आचार-विचार-व्यवहारक्षेत्रेषु मानावानाम् उन्नतिपूर्वकं देशस्यापि उन्नतिर्भविष्यति ॥

"जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः। नास्ति येषां यशः काये जरामरणजं भयम्" ॥

**ग्रन्थ सूची**


1. बाणभट्टः, हर्षचरितम्, विद्याभवन संस्कृत-ग्रन्थमाला, चैखाम्बा विद्याभन, वाराणासी, १९४६
2. उपाद्यायः बलदेवः, संस्कृतवाङ्मय का इतिहास, उत्तरप्रदेहश संस्कृत संस्थानम्, लखनौ २००६.
3. याणाचार्यः, ऋग्वेदभाष्यभूमिका, चौखाम्बा कृष्णदास् अकाडेमी,वाराणासी,२००५
4. वैदिकसाहित्य चरित्रे, डा. एन् एस् अनन्तरङ्गाचार्, डि वि के मूर्ति प्रकाशकाः, मैसूरु, २००१


[9] हर्षचरितम् – प्रथम-उच्छ्वासः

[10] हर्षचरितम् – प्रथम-उच्छ्वासः

[11] हर्षचरितम् – प्रथम-उच्छ्वासः

[12] हर्षचरितम् – प्रथम-उच्छ्वासः

[13] हर्षचरितम् – प्रथम-उच्छ्वासः